# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ७** | गुणाः - ७० |
| विषयः - वास्तुशास्त्रम् | (C.E.- 2.3.3. Old & New ) | |
| दिनाङ्कः - ११/१२/२०१८ | ग्रन्थः वास्तुराजवल्लभः | समयः -२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु द्वयानां सान्वयं व्याख्यां कुरुत ।** ( १० )

(१) स्वादे भवेद्या मधुरासिताभा चतुर्षुवर्णेषु महीप्रशस्ता ।
स्नेहान्विता बभ्रुभुजङ्गयोर्वा सुहृद्वती चासुबिडालयोर्वा ॥

(२) आपवत्सौ शिवकोणमध्ये सावित्रकोऽग्नौ सविता तथैव ।
कोणे महेन्द्रेन्द्र जययौतृतीये सद्रोनिलेन्योऽपि च रुद्रदासः ॥

(३) वादित्रे स्वरजीविनामपि गृहे शूद्रे गजो योजितो ।
थाने स्त्रीगृहवाहने च शयने शस्तो गृहे हस्तिनाम् ॥

**प्रश्नः २** वास्तुपदमण्डलानां नैवेद्यविधानं ग्रन्थाधारेण दर्शयत । ( १० )

**( अथवा )**

गजभेदाः प्रयोगश्च ग्रन्थोक्तदिशा प्रतिपादयत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितद्वयानां सान्वयं व्याख्यां कुरुत ।** ( १० )

(१) यष्ट्या दृढां मर्कटिका विद्ध्याल्लौहस्य कीलेन च चर्मणापि ।
यन्त्रं प्रकुर्यादृढकाष्टकं च तन्मानया ज्योतिकया समेतम् ॥

(२) ग्रामाधिया ये तु शताधिपाश्च ते स्वल्पराष्टा अपसैनिकाश्च ।
तेषां गृहा अष्टदशाधिकैश्च करैः समाना मुनिनिर्मिताश्च ॥

(३) द्वारोर्ध्वे यद् द्वारमस्य प्रमाणं सङ्कीर्णं वा शोभनं नाधिकं तत् ।
ह्रस्वद्वाराण्येव यानि पृथूनि तेषां शीर्षाण्येकसूत्राणि कुर्यात् ॥

**प्रश्नः ४** द्वारस्थापनविचारः सविस्तारं स्पष्टयत । ( १० )

**( अथवा )**

विविधपुराणां गुणदोषाः ग्रन्थोक्तदिशा वर्णयत ।

## तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितश्लोकद्वयानां सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) मेघं गृहं चैव मनोरमं च सुभद्रसंज्ञं कथिता च संख्या ।
इत्येकशालानि गृहाणि विद्याच्छतं वचत्वार्थधिकं ध्रुवादि ॥

(२) लघुश्च पश्चात् पुरतोऽपि युग्मं स्यादक्षिणैको रसदारुमध्ये ।
तत् त्रैपुरं सुन्दरमेवनीलं स्यात् कौटिलं चैव यथाक्रमेण ॥

(३) मुखे त्रयं दक्षिणपश्चिमैकः षड्दारुकं श्रीधरनामधेयम् ।
प्रोक्तं गृहे कामद-पुष्टिदे च चतुर्थकं कीर्तिविनाशमेव ॥

**प्रश्नः ६** सूर्यादिषोड्शगृहाणां वर्णनं ग्रन्थोक्तदिशा दर्शयत । **( १० )**

**( अथवा )**

सिंहासननिर्माणविधानं विशदयत ।

## चतुर्थान्वितिः

**प्रश्नः ७ केषाश्चित् दशप्रश्नानामुत्तराणि देयानि ।** **( १० )**

(१) सभा कति विधा ?

(२) गवाक्षस्य अपरनाम किम् ?

(३) ब्राह्मणगृहे वेदिकामानं किम् ?

(४) राजगृहनिवेशादिलक्षणं कस्मिन् अध्याये वर्तते ।

(५) कूपप्रकाराः कति ?

(६) एकमुखीवाप्याः नाम किम् ?

(७) सुभद्रतडागे कति भद्राणि सन्ति ।

(८) सर्वश्रेष्ठदुर्गः कः ?

(९) माहेन्द्रनगरस्य आकृतिः किदृशी ?

(१०) गृह-गृहस्वामीमेलापके एकानाडी भवेत् तत्फलं किम् ?

(११) बिडालवर्गस्य वैरवर्गः कः ?

(१२) मङ्गलः कस्मिन् राश्याः स्वामी अस्ति ?

(१३) राजप्रासादे कस्मिन् आयस्य प्रयोगः भवति ?

(१४) अकपाटमनाच्छिन्नसदनं प्रवेशे किं फलम् ?

(१५) एकपर्व = कति मात्रा ?

--००--